Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३६६१ / घ

Title रघुवंशः (६-७ सर्गौ)

Author म· कालिदासः

Extent १० पत्र Age

Subject काव्य

© Dharmartha Trust J&K. Digitized by eGangotri

रघुवंशे षष्ठसप्तमसर्गौ

३६१

१० पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशायनमः॥ ॥सतत्रमंचेषुमनोज्ञवेषान्सिंहासनस्थानुपचारवत्सु॥ वैमानिकानांमरुताम
पश्यदाकृष्टलीलान्नरलोकपालान्॥१॥ रतेर्गृहीतानुनयेन कामंप्रत्यर्पितस्वांगमिवेश्वरेण॥ का
कुत्स्थमालोकयतांन्नृपाणांमनोबभूवेंदुमतीनिराशं॥२॥ वैदर्भनिर्दिष्टमथोकुमारः क्लृप्तेनसोपा
नपथेनमंचं॥ शिलाविभंगैर्मृगराजशावस्तुंगंनगोत्संगमिवारुरोह॥३॥ परार्ध्यवर्णास्तरणो
पपन्नमासेदिवान्रत्नवदासनंसः॥ भूयिष्ठमासीदुपमेयकांतिर्मयूरपृष्ठाश्रयिणागुहेन॥४॥
तासुश्रियाराजपरंपरासुप्रभाविशेषोदयदुर्निरीक्ष्यः॥ सहस्रधात्माव्यरुचद्विभक्तः पयोमुचां
पंक्तिषुविद्युतेव॥५॥ तेषांमहार्हासनसंस्थितानामुदारनेपथ्यभृतांसमध्ये॥ रराजधाम्ना
रघुसूनुरेवकल्पद्रुमाणामिवपारिजातः॥६॥ नेत्रव्रजाःपौरजनस्यतस्मिन्विहायसर्वान्
न्नृपतीन्निपेतुः॥ मदोत्कटेरेचितपुष्पवृक्षागंधद्विपेवन्यइवद्विरेफाः॥ ७॥ अथस्तुतेबंदिभिरन्व
यज्ञैःसोमार्कवंश्येनरदेवलोके॥ संचारितेचागुरुसारयोनौधूपेसमुत्सर्पतिवैजयंतीः॥८॥ पुरोपकंठोप

© Dharmartha Trust J&K. Digitized by eGangotri

रघु • वनाश्रयाणां शिखंडिनामप्युन्नतनृत्यहेतौ ॥ प्रध्मातशंखे परितो दिगंतान्तूर्यस्वने मूर्छति मंगलार्थे ॥९॥ मनुष्यवा
ह्यं चतुरस्रयानमध्यास्य कन्या परिवारशोभि ॥ विवेश मंचांतरराजमार्गं पतिंवराक्लृप्तविवाहवेषा ॥१०॥ त्रिभि
१ र्विशेषकं ॥ तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ॥ निपेतुरंतःकरणैर्नरेंद्रा देहैः स्थिताः के
वलमासनेषु ॥११॥ तांप्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ॥ प्रवालशोभा इव पादपानां
शृंगारचेष्टा विविधा बभूवुः ॥१२॥ कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं ॥ रजोभिरंतःपरिवेषबं
धिलीलारविंदं भ्रमयांचकार ॥१३॥ विस्रस्तमंसादपरो विलासी रत्नानुविद्धांगदकोटिलग्नं ॥ प्रावार
मुत्क्षिप्य यथाप्रदेशं निनाय साचीकृतचारुवक्त्रः ॥१४॥ आकुंचिताग्रांगुलिना ततोन्यः किंचित्समावर्जि
तनेत्रशोभः ॥ रत्नांशुसंपृक्तनखप्रभेण पादेन हैमं विलिलेख पीठं ॥१५॥ निवेश्य वामं भुजमासनार्द्धे त
त्संनिवेशादधिकोन्नतांसः ॥ कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभाषणतत्परोभूत् ॥१६॥ विलासिनीविभ्र
मदंतपत्रमापांडुरं केतकपत्रमन्यः ॥ प्रियानितंबोचितसंनिवेशैर्विपाटयामास युवा नखाग्रैः ॥१७॥ १

© Dharmartha Trust J&K. Digitized by eGangotri

कुशेशयाताम्रतलेनकश्चित्करेणरेखाध्वजलांछितेन॥रत्नांगुलीयप्रभयानुविद्धानुदीरयामाससली
लमक्षान्॥१८॥कश्चिद्यथाभागमवस्थितेपिस्वसंनिवेशाद्व्यतिलंघिनीव॥वज्रांशुगर्भांगुलिरंध्रमेकं
व्यापारयामासकरंकिरीटे॥१९॥ततोनृपाणांश्रुतवृत्तवंशापुंवत्प्रगल्भाप्रतिहारपाली॥
प्राक्संनिकर्षंमगधेश्वरस्यनीत्वाकुमारीमवदत्सुनंदा॥२०॥असौशरण्यःशरणो
न्मुखानामगाधसत्वोमगधप्रतिष्ठः॥राजाप्रजारंजनलब्धवर्णःपरंतपोनामयथा
र्थनाम॥२१॥कामंनृपाःसंतुसहस्रशोन्येराजन्वतीमाहुरनेनभूमिं॥नक्षत्रताराग्रहसंकुला
पिज्योतिष्मतीचंद्रमसैवरात्रिः॥२२॥क्रियाप्रबंधादयमध्वराणामजस्रमाहूतसहस्र
नेत्रः॥शच्याश्चिरंपांडुकपोललंबान्मंदारशून्यानलकांश्चकार॥२३॥अनेनचेदिच्छसि
गृह्यमाणंपाणिंवरेण्येनकुरुप्रवेशे॥प्रासादवातायनसंस्थितानांनेत्रोत्सवंपुष्पपुरांगनानां॥
॥२४॥एवंतयोक्तेतमवेक्ष्यकिंचिद्विस्रंसिदूर्वांकमधूकमाला॥ऋजुप्रणामक्रिययैवतन्वीप्र

© Dharmartha Trust J&K. Digitized by eGangotri

श्र

र॰ कम् त्यादिदेशैनमभाषमाणा ॥२५॥ तांसैववेत्रग्रहणेनियुक्ताराजांतरंराजसुतांनिनाय॥ समीर
णोत्थैवतरंगलेखापद्मांतरंमानसराजहंसी ॥२६॥ जगादचैनामयमंगनाथः सुरांगनाप्रार्थित
२ यौवनश्रीः॥ विनीतनागः किलसूत्रकारैरैंद्रंपदंभूमिगतोपिभुंक्ते॥२७॥ अनेनपर्यासयताश्रु
2 बिंदून्मुक्ताफलस्थूलतमान्स्तनेषु॥ प्रत्यर्पिताः शत्रुविलासिनीनामाक्षिप्यसूत्रेणविनैवहाराः॥
२८॥ निसर्गभिन्नास्पदमेकसंस्थमस्मिन्द्वयंश्रीश्चसरस्वतीच॥ कांत्यागिरासूनृतयाचयोग्या त्वमेव
कल्याणितयोस्तृतीया॥२९॥ अथांगराजादवतार्यचक्षुर्यातेतिजन्यामवदत्कुमारी॥ नासौन ज
काम्योनचवेदसम्यग्द्रष्टुंनसाभिन्नरुचिर्हिलोकः॥३०॥ ततः परंदुःप्रसहंपरेषांनृपंनियुक्ताप्रतिहारभू
मौ॥ निदर्शयामासविशेषकांतमिंदुंनवोत्थानमिवेंदुमत्यै॥३१॥ अवंतिनाथोयमुदग्रबाहुर्विशालवक्षा
स्तनुवृत्तमध्यः॥ आरोप्यचक्रभ्रममुष्णतेजास्त्वष्ट्रेवयंत्रोल्लिखितोविभाति॥३२॥ अस्यप्रयाणेषुसमग्रश राम
क्तेरग्रेसरैर्वाजिभिरुत्थितानि॥ कुर्वंतिसामंतशिखामणीनांप्रभाप्ररोहास्तमयंरजांसि॥३३॥ असौ २

© Dharmartha Trust J&K. Digitized by eGangotri

महाकालनिकेतनस्य वंद्राधमौलेर्निवसंनदूरे ॥ तमिस्रपक्षेपिसहप्रियाभिः ज्योत्स्नावतो निर्विशति प्र
दोषान् ॥३४॥ अनेनयूनासहपार्थिवेनरंभोरुकच्चिन्मनसोरुचिस्ते ॥ शिप्रातरंगानिलकंपितासु वि
हर्तुमुद्यानपरंपरासु ॥३५॥ तस्मिन्नभिद्योतितबंधुपद्मे प्रतापसंशोषितशत्रुपंके ॥ बबं
धसानोत्तमसौकुमार्या कुमुद्वतीभानुमतीवभावं ॥३६॥ तामग्रतस्तामरसांतराभामनूप
राजस्यगुणैरनूनां ॥ विधायसृष्टिंललितांविधातुर्जगादभूयःसुदतींसुनंदा ॥३७॥ संग्रा
मनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः ॥ अनन्यसाधारणराजशब्दोबभूवयोगी
किलकार्तवीर्यः ॥३८॥ अकार्यचिंतासमकालमेवप्रादुर्भवंश्चापधरःपुरस्तात् ॥ अंतः
शरीरेष्वपियःप्रजानांप्रत्यादिदेशाविनयंविनेता ॥३९॥ ज्याबंधनिष्पंदभुजेनयस्यविनि
श्वसद्वक्त्रपरंपरेण ॥ कारागृहेनिर्जितवासवेनलंकेश्वरेणोषितमाप्रसादात् ॥४०॥
तस्यान्वयेभूपतिरेषजातः प्रतीपइत्यागमवृद्धसेवी ॥ येनश्रियःसंश्रयदोषरूढंस्वभावलो

© Dharmartha Trust J&K. Digitized by eGangotri

२.वं.पू. लेस्य यशः प्रसृष्टं ॥४१॥ आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं ॥ धारां शितां
रामपरश्वधस्य संभावयत्युत्पलपत्रसारां ॥४२॥ अस्यांकलक्ष्मीर्भव दीर्घबाहो
२ र्माहिष्मतीवप्रनितंबकांचीं ॥ प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्ति
३ कामः ॥४३॥ तस्याः प्रकामं प्रियदर्शनोपि न स क्षितीशो रुचये बभूव ॥ शरत्प्रमृष्टां
बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥४४॥ सा शूरसेनाधिपतिं सुषेणमुद्दि
श्य देशान्तरगीतकीर्तिं ॥ आचारशुद्धोभयवंशदीपं शुद्धान्तरक्ष्या जगदे कुमारी ॥४५॥
नीपान्वयः पार्थिव एष यज्वा गुणैर्यमाश्रित्य परस्परेण ॥ सिद्धाश्रमं शान्तमिवेत्य सत्वैर्नैसर्गिकोप्यु
त्ससृजे विरोधः ॥४६॥ यस्यात्मगेहे नयनाभिरामा कान्तिर्हिमांशोरिव संप्रविष्टा ॥ हर्म्या
ग्रसंरूढतृणांकुरेषु तेजोविषह्यं रिपुमंदिरेषु ॥४७॥ यस्यावरोधस्तनचंदनानां प्रक्षालना
द्वारिविहारकाले ॥ कलिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ॥४८॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्रसेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः॥ वक्षस्थलव्यापिरुचिं द
धानः स कौस्तुभं ह्रेपयतीव विष्णुं॥४९॥ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तर
पुष्पशय्ये॥ वृंदावने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः॥५०॥ अध्यास्य चां
भः पृषतोक्षितानि शैलेयगंधीनि शिलातलानि॥ कलापिनां प्रावृषि पश्य नृत्यं कांता
सु गोवर्द्धनकंदरासु॥५१॥ नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवि
त्री॥ महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव॥५२॥ अथांगदाश्लिष्ट
भुजं भुजिष्या हेमांगदं नाम कलिंगनाथं॥ आसेदुषीं सादितशत्रुपक्षं बालामबा
लेंदुमुखीं बभाषे॥५३॥ असौ महेंद्राद्रिसमानसारः पतिर्महेंद्रस्य महोदधेश्च॥ य
स्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महेंद्रः॥५४॥ ज्याघातलेखे सुभुजो
भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः॥ रिपुश्रियः सांजनबाष्पसेके बंदीकृताया इव

© Dharmartha Trust J&K. Digitized by eGangotri

र.वं.मू. पद्धतीद्दूं ॥५५॥ यमात्मनः सद्मनि संनिकृष्टो मंद्रध्वनिं त्याजितयामतूर्यः ॥ प्रासादवातायन
दृश्यवीचिः प्रबोधयत्यूर्मिभिरेव सुप्तं ॥५६॥ अनेन सार्धं विहराम्बुराशेस्तीरेषु तालीवनम
४ र्मरेषु ॥ द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥५७॥ प्रलोभिताप्याकृ
ति लोभनीया विदर्भराजावरजा तयैवं ॥ तस्मादपावर्तत दूरकृष्टा नीत्येव लक्ष्मीः
प्रतिकूलदैवात् ॥५८॥ अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य ॥
इतश्चकोराक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्यां ॥५९॥ पांड्योयमंसा
र्पितलंबहारः कॢप्तांगरागो हरिचंदनेन ॥ आभाति बालातपरक्तसानुः सनिर्झ
रोद्गार इवाद्रिराजः ॥६०॥ विंध्यस्य संस्तंभयिता महाद्रेर्निःशेषपीतोज्झितसिंधुराजः ॥
प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः ॥६१॥ अस्त्रं हरादा
प्तवता दुरापं येनेंद्रलोकावजयाय दृप्तः ॥ पुराजनस्थानविमर्दशंकी संधाय लंका ४

© Dharmartha Trust J&K. Digitized by eGangotri

धिपतिः प्रतस्थे ॥६२॥ अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ।
रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः ॥६३॥ तांबूलवल्ली
परिणद्धपूगास्वेलालतालिंगितचंदनासु ॥ तमालपत्रास्तरणासु रंतुं प्रसीद शश्वन्म
लयस्थलीषु ॥६४॥ इंदीवरश्यामतनुर्नृपोयं त्वं रोचनागौरशरीरयष्टिः ॥ अन्योन्यशो
भापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥६५॥ स्वसुर्विदर्भाधिपतेस्तदीयो ले
भेंतरं चेतसि नोपदेशः ॥ दिवाकरादर्शनबद्धकोशे तारापतेरंशुरिवारविंदे ॥६६॥ संचा
रिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ॥ नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं
स स भूमिपालः ॥६७॥ तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोभूत् ॥
वामेतरः संशयमस्य बाहुः केयूरबंधोच्छ्वसितैर्नुनोद ॥६८॥ तं प्राप्य सर्वावयवानवद्यं न्यव
र्तता न्योपगमात्कुमारी ॥ न हि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ॥६९॥

© Dharmartha Trust J&K. Digitized by eGangotri

र॰वं॰

तस्मिंस्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य ॥ प्रचक्रमे वक्तुमनुक्रम-
ज्ञा सविस्तरं वाक्यमिदं सुनंदा ॥ ७० ॥ इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितल-
क्षणोभूत् ॥ काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेंद्राः ॥ ७१ ॥ म-
हेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ॥ चकार बाणैरसुरांगनानां
5 गंडस्थलीः प्रोषितपत्रलेखाः ॥ ७२ ॥ ऐरावणास्फालनविश्लथं यः संघट्टयन्नंगद-
मंगदेन ॥ उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदोधितस्थौ ॥ ७३ ॥ जातः कु-
ले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः ॥ अतिष्ठदेकोनशतक्रतुत्वे शक्रा-
भ्यसूयाविनिवृत्तये यः ॥ ७४ ॥ यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्धप-
थे गतानां ॥ वातोपि नास्रंसयदंशुकानि को लंबयेदाहरणाय हस्तं ॥ ७५ ॥ राम
पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ॥ चतुर्दिगावर्जितसं-

© Dharmartha Trust J&K. Digitized by eGangotri

भर्त्तां योमृत्या ग्रशेषामकरोद्विभूतिं ॥७६॥ आरूढमद्रीनुदधीनतीर्णभुजंगमा
नां वसतिं प्रविष्टं ॥ ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ॥७७॥ अ
सौ कुमारस्तमजोनुजातस्त्रिविष्टपस्येव पतिं जयंतः ॥ गुर्वीं धुरं यो भुवनस्य पित्रा धुर्ये
ण दम्यः सदृशं बिभर्ति ॥७८॥ ताकुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधा
नैः ॥ त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन ॥७९॥ ततः सुनंदाव
चनावसाने लज्जां मृदूकृत्य नरेंद्रकन्या ॥ दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रही
त्संवरणस्रजेव ॥८०॥ सा यूनि तस्मिन्नभिलाषबंधं शशाक शालीनतया न वक्तुं ॥
रोमांचलक्ष्येण शरीरयष्टिं भित्वा निराक्रामदरालकेश्याः ॥८१॥ तथागतायां प
रिहासपूर्वं सख्यां सखी वेत्रधरा बभाषे ॥ आर्ये व्रजामोन्यत इत्यथैनां वधूरसू
यांकुटिलं ददर्श ॥८२॥ सा चूर्णगौरं रघुनंदनस्य धात्रीकराभ्यां करभोपमोरुः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

र॰ वं॰ आसंजयामास यथाप्रदेशं कंठे गुणं मूर्तमिवानुरागं ॥८३॥ तया स्रजा मंगलपुष्पमय्या
६ विशालवक्षःस्थललंबया सः ॥ अमंस्त कंठार्पितबाहुपाशां विदर्भराजावरजां वरे
ण्यः ॥८४॥ शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जन्हुकन्यावतीर्णा
॥ इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं वि
वव्रुः ॥८५॥ प्रमुदितवरपक्षमेकतस्तत् क्षितिपतिमंडलमन्यतो वितानं ॥ उषसि
सर इव प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत् ॥८६॥ ॥ इति श्रीरघुवंशे महाका
व्ये कालिदासकृतौ स्वयंवरप्रदानं नाम षष्ठः सर्गः ॥ ॥ श्रीसीतारामचंद्राभ्यां नमः ॥
॥ ओं ॥ अथोपयंत्रा सदृशेन युक्तां स्कंदेन साक्षादिव देवसेनां ॥ स्वसारमादाय विद
र्भनाथः पुरप्रवेशाभिमुखो बभूव ॥१॥ सेनानिवेशान्पृथिवीक्षितोपि जग्मुर्विभातग्र
हमंदभासः ॥ भोज्यां प्रति व्यर्थमनोरथत्वाद्रूपेषु वेषेषु च साभ्यसूयाः ॥२॥ सांनिध्य

© Dharmartha Trust J&K. Digitized by eGangotri

योगात्किंतत्रशान्त्याःस्वयंवरक्षोभकृतामभावः॥ काकुत्स्थमुद्दिश्यसमत्सरोपिशशामतेन
क्षितिपाललोकः॥३॥ तावत्प्रकीर्णाभिनवोपचारमिंद्रायुधद्योतिततोरणांकं॥ वरःसवध्वास
हराजमार्गंप्रापध्वजछायनिवारितोष्णं॥४॥ ततस्तदालोकनतत्पराणांसौधेषुचामीकरजा
लवत्सु॥ बभूवुरित्थंपुरसुंदरीणांत्यक्तान्यकार्याणिविचेष्टितानि॥५॥ आलोकमार्गंसहसा
व्रजंत्याकयाचिदुद्वेष्टनवांतमाल्यः॥ बंधुंनसंभावितएवतावत्करेणरुद्धोपिहिकेशपाशः॥६॥
प्रसाधिकालंबितमग्रपादमाक्षिप्यकाचिद्द्रवरागमेव॥ उत्सृष्टलीलागतिरागवाक्षाद
लक्तकांकांपदवींततान॥७॥ विलोचनंदक्षिणमंजनेनसंभाव्यतद्वंचितवामनेत्रा॥ तथैववा
तायनसंनिकर्षंययौशलाकामपरावहंती॥८॥ जालांतरप्रेषितदृष्टिरन्याप्रस्थानभिन्नांनबबं
धनीवीं॥ नाभिप्रविष्टाभरणप्रभेणहस्तेनतस्थाववलंब्यवासः॥९॥ अर्द्धाचितासत्वरमुत्थि
तायाःपदेपदेदुर्निमितेगलंती॥ कस्याश्चिदासीद्रशनातदानीमंगुष्ठमूलार्पितसूत्रशेषा
॥१०॥ तासांमुखैरासवगंधगर्भैर्व्याप्तांतराःसांद्रकुतूहलानां॥ विलोलनेत्रभ्रमरैर्गवाक्षाः

© Dharmartha Trust J&K. Digitized by eGangotri

र.वं.मू. १ सहस्रपत्राभरणा इवासन् ॥११॥ ताराघवं दृष्टिभिरापिबंत्यो नार्यो न जग्मुर्विषयांतराणि ॥
तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ॥१२॥ स्थाने वृता भूपतिभिः
परोक्षैः स्वयंवरं साधुममंस्त भोज्या ॥ पद्मेव नारायणमन्यथासौ लभेत कांतं कथमा
त्मतुल्यं ॥१३॥ परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत् ॥ अस्मिन्द्वये रू
पविधानयत्नः पत्युः प्रजानां वितथोऽभविष्यत् ॥१४॥ रतिस्मरौ नूनमिमावभूतां राज्ञां स
हस्रेषु तथा हि बाला ॥ गतेयमात्मप्रतिरूपमेव मनो हि जन्मांतरसंगतिज्ञं ॥१५॥ इत्युद्गताः
पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः ॥ उद्भासितं मंगलसंविधाभिः संबं राम
धिनः सद्म समाससाद ॥१६॥ तत्रावतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः ॥ १
वैदर्भनिर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमंतः ॥१७॥ महार्हसिंहासनसं

© Dharmartha Trust J&K. Digitized by eGangotri

स्थितोसौस्करत्नमर्घं मधुपर्कमिश्रं ॥ भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटा
क्षैः ॥ १८ ॥ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधरक्षैः ॥ वेलासकाशं स्फुटफे
नराजिर्नवैरुदन्वानिव चंद्रपादैः ॥ १९ ॥ तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमाज्यादिभिर
ग्निकल्पः ॥ तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयांचकार ॥ २० ॥ हस्तेन हस्तं प
रिगृह्य वध्वाः स राजसूनुः सुतरां बभासे ॥ अनंतराशोकलताप्रवालं प्राप्येव चूतः प्रति
पल्लवेन ॥ २१ ॥ आसीद्वरः कंटकितप्रकोष्ठः स्विन्नांगुलिः संववृते कुमारी ॥ तस्मिन्द्वये
तत्क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन ॥ २२ ॥ तयोरूपांतप्रतिसारितानि क्रियास
मापत्तिषु कातराणि ॥ ह्रीयंत्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि ॥ २३ ॥
प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं चकासे ॥ मेरोरुपांतेष्विव वर्तमानमन्योन्यसं

© Dharmartha Trust J&K. Digitized by eGangotri

ज

र.वं.टू. सक्तमहस्त्रियामं ॥२४॥ नितंबगुर्वी गुरुणा प्रयुक्ता वधूर्विधातृप्रतिमेन तेन ॥ चकार सा मत्तचकोरनेत्रा लज्जा
वती लाजविसर्गमग्नौ ॥२५॥ हविःशमीपल्लवलाजगंधी पुण्यः कृशानोरुदियाय धूमः ॥ कपोलसंसर्पिशि
खः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे ॥२६॥ तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं ॥
४ वधूमुखं पाटलगंडलेखमाचारधूमग्रहणाद्बभूव ॥२७॥ तौ स्नातकैर्बंधुमता च राज्ञा पुरंध्रि
भिश्च क्रमशः प्रयुक्तं ॥ कन्याकुमारौ कनकासनस्थावार्द्राक्षतारोपणमन्वभूतां ॥२८॥ इति स्वसुर्भोज
कुलप्रदीपः संपाद्य पाणिग्रहणं स राजा ॥ महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीः ॥
॥२९॥ लिंगैर्मुदः संवृतविक्रियास्ते ह्रदाः प्रसन्ना इव गूढनक्राः ॥ वैदर्भमामंत्र्य ययुस्तदीयां प्रत्यर्प्य पू
जामुपदाछलेन ॥३०॥ स राजलोकः कृतपूर्वसंविदारंभसिद्धौ समयोपलभ्यं ॥ आदास्यमानः प्रमदा
मिषं तदावृत्य पंथानमजस्य तस्थौ ॥३१॥ भर्तापि तावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः
सत्वानुरूपाहरणीकृतश्रीः प्रास्थापयद्राघवमन्वगाच्च ॥३२॥ तिस्रः त्रिलोकीप्रथितेन सार्ध
मजेन मार्गे वसतीरुषित्वा ॥ तस्मादपावर्तत कुंडिनेशः पर्वात्यये सोम इवोष्णरश्मेः ॥३३॥ प्रमन्यवः

प्रागपि कोसलेंद्रप्रसेकमातस्वतयावभूवुः॥ अतोन्यपाश्र्चसामिरेसमेताः स्मोरलं लाभंनुदास जस्य॥
॥ ३५॥ निमुहूर्त्तनृपस्थिभोजकन्यांरुरोधूरीजन्यगणःसदृप्तः॥ बलिप्रदिष्टांश्रियमाददानंत्रैविक्रमंपा
दमिवेंद्रशत्रुः॥ ३५॥ तस्याःसरक्षार्थमनल्पयोधमादिश्यपित्र्यंसचिवंकुमारः॥ प्रत्यग्रहीत्पार्थिववा
हिनींतांभागिरथींशोणइवोत्तरंगः॥ ३६॥ पत्तिःपदातिंरथिनंरथेशस्तुरंगसादीतुरगाधिरूढं॥ यंता
गजस्याभ्यपतद्गजस्थंतुल्यप्रतिद्वंद्विबभूवयुद्धं॥ ३७॥ नदत्सुतूर्येष्वविभाव्यवाचोनोदीरयंतिस्मकुलोपदेशा
न्॥ बाणाक्षरैरेवपरस्परस्यनामोर्जितंचापभृतःशशंसुः॥ ३८॥ उत्थापितःसंयतिरेणुरश्र्वैःसांद्रीकृतः
स्यंदनवंशचक्रैः॥ विस्तारितःकुंजरकर्णतालैर्नेत्रक्रमेणोपरुरोधसूर्यं॥ ३९॥ मत्स्यध्वजावायुवशाद्विदी
र्णैर्मुखैःप्रवृद्धध्वजिनीरजांसि॥ बभुःपिबंतःपरमार्थमत्स्याःपर्याविलानीवनवोदकानि॥ ४०॥ रथोरथांगे
ध्वनिनाविजज्ञेविलोलघंटाक्वणितेननागः॥ स्वभर्तृनामग्रहणाद्बभूवसांद्रेरजस्यात्मपरावबोधः॥ ४१॥
आवृण्वतोलोचनमार्गमाजौरजोंधकारस्यविजृंभितस्य॥ शस्त्रक्षताश्वद्विपवीरजन्माबालारुणोभूद्रुधिर
प्रवाहः॥ ४२॥ सच्छिन्नमूलःक्षतजेनरेणुस्तस्योपरिष्टात्पवनावधूतः॥ अंगारशेषस्यहुताशनस्यपूर्वोत्थितो
धूमइवाबभासे॥ ४३॥ प्रहारमूर्छापगमेरथस्थायंतृनुपालभ्यनिवर्तिताश्र्वाः॥ यैःसादितालं

© Dharmartha Trust J&K. Digitized by eGangotri

र.वं.मू. स्विन पूर्वकोद्भूत स्थाने वसामर्षितया निजघ्नुः॥४४॥ अप्यर्धमार्गे परबाणलूना धनुर्भृतां हस्ताव
तां पृषत्काः॥ संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्धभागैः फलिभिः शरव्यं॥४५॥ आधोरणानां गजसंनि
पाते शिरांसि चक्रैर्निशितैः क्षुराग्रैः॥ हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः॥४६॥
पूर्वप्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी॥ तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचकांक्ष कां
॥४७॥ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः पतद्भिः॥ उद्यंतमग्निं शमयांबभूवुर्गजा विवि
ग्नाः करशीकरेण॥४८॥ शिलीमुखोत्कृत्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव॥ रणक्षितिः
शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः॥४९॥ उपांतयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पि
शितप्रियापि॥ केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार॥५०॥ कश्चिद्द्विषत्खड्गहृतो
त्तमांगः सद्यो विमानप्रभुतामुपेत्य॥ वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबंधं समरे ददर्श॥५१॥ रा
अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित्॥ व्यश्वौ गदाव्यायतसंप्रहारौ भग्ना
युधौ बाहुविमर्दनिष्ठौ॥५२॥ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रांतवाय्वोः समकालमेव॥ अमर्त्यभावेपि

© Dharmartha Trust J&K. Digitized by eGangotri

कयोश्चिदासीदेकाप्सरः प्रार्थितयोर्विवादः ॥५३॥ व्यूहावुभौ ताविततरेतरस्मात्भंगं जयं चापतुर
व्यवस्थं ॥ पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥५४॥ परेण भग्नेपि बले महौजा य
यावजः प्रत्यरिसैन्यमेव ॥ धूमो निवर्त्येत समीरणेन यतो हि कक्षस्तत एव वह्निः ॥५५॥ रथी निषं
गी कवची धनुष्मान्दृप्तः स राजन्यकमेकवीरः ॥ विलोडयामास महावराहः कल्पक्षयोद्धूतमिवार्णवां
भः ॥५६॥ स दक्षिणं तूणमुखेन वामं व्यापारयन्हस्तमलक्ष्यताजौ ॥ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वी
व बाणान्सुषुवे रिपुघ्नान् ॥५७॥ स रोषदष्टाधिकलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः ॥ तस्ता
र गां भल्लनिकृत्तकंठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ॥५८॥ सर्वैर्बलांगैर्द्विरदप्रधानैः सर्वायुधैः कंकटभेदि
भिश्च ॥ सर्वप्रयत्नेन च भूमिपालाः तस्मिन्प्रजह्रुर्युधि सर्व एव ॥५९॥ सोस्त्रव्रजैश्छन्नरथः प
रेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ॥ नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥६०॥
प्रियंवदात्प्राप्तमसौ कुमारः प्रायुंक्त राजस्वधिराजसूनुः ॥ गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्व
प्ननिवृत्तलौल्यः ॥६१॥ ततो धनुःकर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं ॥ तस्थौ ध्वजस्त

© Dharmartha Trust J&K. Digitized by eGangotri

र·वं·प्र· भनिषण्णदेहं निद्राविधेयं नरदेवसैन्यं ॥६२॥ ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ॥ तेन
स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्तमिवाबभासे ॥६३॥ शंखस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं दद
१० शुः स्वयोधाः ॥ निमीलितानामिव पंकजानां मध्ये स्फुरन्तं प्रतिमाशशांकं ॥६४॥ सशोणितैस्तेन शिलीमु
खाग्रैर्निक्षेपिताः केतुषु पार्थिवानां ॥ यशोहृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ॥६५॥ सचाप
कोटीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ॥ ललाटबद्धश्रमवारिबिंदुर्भीतां प्रियामेत्य वचो बभाषे
॥६६॥ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि ॥ एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्त
गता ममैभिः ॥६७॥ तस्याः प्रतिद्वंद्विभवाद्विषादात्सद्यो विमुक्तं मुखमाबभासे ॥ निःश्वासबाष्पापगमात्प्र
पन्नः प्रसादमात्मीयमिवात्मदर्शः ॥६८॥ हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनंद
त् ॥ स्थली नवाम्भःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृंदं ॥६९॥ इति शिरसि स वामं पादमा
धाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः ॥ रथतुरगरजोभिस्तस्य रूक्षालकान्ता समरवि
जयलक्ष्मीः सैव मूर्ता बभूव ॥ ७० ॥ प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विजयिनमभिनंद्य श्लाघ्य १०
जायासमेतं ॥ तदुपहितकुटुंबः शांतिमार्गोत्सुकोऽभून्न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥ ७१ ॥

© Dharmartha Trust J&K. Digitized by eGangotri